अथ पूर्वत्रिके

उपत्वाग्न इतीक्ष्वादिभिर्मानस्तोकात् फलाम्भसा ।

अश्वावत्या कषायेण

अथ दक्षिणत्रिके

सुमित्रानस्तु लाजकान् ।।१५१ ।।

गन्धाम्भसाग्नआयाहि पुष्पवत्या तु पुष्पकान् ।

हिरण्यवर्णाः शुचयौ ब्रह्मजज्ञानमित्यषि।। १५२ ।।

अ (था ?थो) समुद्रज्येष्ठाद्यात् पश्चिमत्रितयेन तु ।

रक्षोहणं वास्तोष्पते शन्नोदेव्यादिनापि च ।। १५३।।

यवाम्भोविद्रुमाम्भोभिस्तिलाम्भोभिस्तथात्तरे ।

दूर्वाम्भसायनेतेति श्रियो जातेति चोत्पलान् ।। १५४।।

त्रिष्टुभाथ कुशम्भोभिरथ शाल्युदकं पुनः ।

आशुःशिशानआद्येन स्नपयेत् पार्वतीपतिम् ।। १५५।।

मध्यस्थनवकुम्भेन महत्या व्योमविद्यया ।

अथवा ब्रह्मभिश्चङ्गैर्गायत्र्या शिवसञ्ज्ञया ।। १५६ ।।

सावित्र्या मूर्तिमन्त्रैश्च स्नपयेद् व्योमविद्यया ।

पञ्चर्विशतेः

एकोनपञ्चाशत्कलशः 49

अथ त्वेकोनपञ्चाशत्कलशानां तु मध्यतः । १५७ ।।

हिरण्यरत्नगन्धैस्तु मध्यकुम्भं प्रपूरयेत् ।

पाद्याचामार्घ्यगव्याज्यमधुक्षीरदधीनि च ।।१५८।।

मध्याष्टकस्य तूक्तानि पूरणेऽथैन्द्रपञ्चकै ।

चन्दनागरुकर्पूरकुङ्कुमोशीरवारिभिः ।। १५९ ।।

आग्नेये पञ्चके शस्तं पञ्चधान्यैश्च नर्ऋते ।

कुसुमोत्पलकल्हारपद्मश्चेतोत्पलैरपि ।।१६० ।।

वायव्यपञ्चकेऽथैशे मल्लिकाजातिचम्पकैः ।

पाटलैः करवीरैश्च पञ्चकं पूरयेत् क्रमात् ।। १६१।।

शिवब्रह्माङ्गमन्त्रेशमध्यमं नवकं स्मृतम् ।

ऐन्द्रादिकाष्टदिङ्मध्य + + + + मूर्तयः ।। १६२।।

मध्याद् दक्षिणतोऽष्टानां वामाद्याः शक्तयो यथा ।

मध्यादुत्तरकोष्ठानां शर्वाद्यं मूर्तिपाष्टकम् ।

तदनन्तरकोष्ठानां वामभीमादिकाष्टकम् ।

शिष्टानाभष्टकोष्ठानां विद्येशाः स्युः क्रमाधिपाः ।।

शिष्टानामष्टकोष्ठानां विद्येशाः स्युः कमाधिपाः ।।१६४ ।।

तन्मान्त्रास्तारह + + + + + तकम् ।

ब्रह्माङ्गैरेव मध्यस्थेनाष्टकेनाभिषेचयेत् ।। १६५ ।।

प्रागादिदिक्पञ्चकैस्तु चमकैः स्नपयेच्छिवम् ।

पावमानीहिरण्यादिचतुष्कोणस्यपञ्चकैः ।।१६६ ।।

मध्ये शिवघटेनापि स्नपयेद व्योमविद्यया ।

एकोनपञ्चाशतः

एकाशीतिकलशः 81

अथैकाशीतिके मध्यकलशे रत्नपञ्चकम् । १६७ ।।

हेम चोक्तं सतीर्थाम्भस्तद्बाह्यकलशाष्टके ।

पाद्याचामार्घ्यगव्याज्यमधुदुग्धदधीन्यपि । १६८ ।।

प्राच्यां तु नवके मध्ये चन्दनं रोचनामरु ।

कर्पूरकुङ्कुमं कुष्ठं मांसीग्रन्थिमुरं तथा ।। १६९ ।।

दक्षिणे वृषशृङ्गेंभदन्तक्षेत्रनदीमृदः ।

तटाकगिरिवल्मीककुलीरह्रदमृत्तिकाः ।। १७० ।।

चतुःक्षीरागविल्वाम्रमधूकाशोकजम्बुजाः ।

शुभास्त्वचश्च वारुण्यां नवके क्रमशः स्मृताः ।। १७१ ।।

कदलीपनसाम्राणि मातुलुङ्गं च डाडिमम् ।

जम्बीरं लिकुचं चाथ नालिकेरं च जाम्बवम् ।। १७२ ।।

फलान्युदीच्यनवके त्वथाग्नय्यां समुद्रजम् ।

नादेयमथ ताटाकं ह्रदाम्भः शुभकूपजम् ।।१७३ ।।

हरिद्रालाजभसितकुसुम्भांम्भासि वै नव ।

नीवारमुद्गमाषाश्च सिद्धार्थयवशालयः ।। १७४ ।।

तिलप्रियङ्गुश्यामाका नऋत्यां नवके स्मृताः ।

लक्ष्मीर्देवी हरिक्रान्ता मुसली भृङ्गराजकः ।। १७५ ।।

सदाभद्राशक्रवल्ली भीता चैकदलाम्बुजम् ।

वायव्यनवके द्रव्याण्येतानि स्युर्यथाक्रमम् ।। १७६ ।।

पद्मद्वयं च कुमुदद्वयं चैवोत्पलत्रयम् ।

इन्दीवरं च कल्हारमैशान्यां नवके क्षिपेत् ।। १७७।।

पाद्यादिकैस्तु ब्रह्माङ्गैरिदंविष्ण्वादिभिस्तथा ।

तद्यथा -

इदं विष्णुर्विचक्रम आपो हि ष्ठा मयोभुवः ।।१७८ ।।

अग्निमीळे पुरोहितमिषेत्वेत्यादिना तथा ।

घृतं मिमिक्षेत्याद्येन मधुवाताऋतायते ।। १७९ ।।

आप्यायस्व समे तु ते दृधिक्रावणो अकारिषम् ।

प्राच्येन नवकेनापोराजानमिति सूक्ततः।। १८०।।

याम्यां पुरुषसुक्तेन कद्रुद्राद्येन पश्चिमे ।

इमाँ रुद्राय तपस इत्युदङ्नवकेन तु ।। १८१।।

आग्नेयनवकेनेमाँ रुद्राय स्थिरधन्वने ।

हिरण्यवर्णाःशुचयः पावकाद्यनुवाकतः ।। १८२

नैर्ऋत्यां नवकेनाथ वायव्यां नवकेन तु ।

हिरण्यश्रृङ्गमित्याद्येनानुवाकान्ततः क्रमात् ।।१८३।।

ऐशान्यां शन्नइन्द्राद्यान्नवकेनाभिषिच्य तु ।

मध्यस्थशिवकुम्भेन महत्या व्योमविद्यया ।। १८४ ।।

एकाशीतेः

अष्टोत्तरशते 108

अष्टोत्तरशते मध्ये रन्तहेमकुशाम्बुभिः ।

शिवकुम्भं समापूर्य तद्बाह्यांशत्रिकेष्वपि ।१८५

न्यग्रोधोदुम्बराश्वत्थैः प्लक्षजम्बुपलाशजैः ।

शिरीषबिल्वमधुकैः सप्तपर्णासनार्ज़ुनैः ।। १८६।।

अग्न्यादिप्वैक्षवं क्षौद्रं तिलं गव्यं तु पञ्चकम् ।

मध्यादिपूर्वनवके कुशमूलाष्टमृत्तिकाः ।।१८७ ।।

शाकप्रियङ्गुमाषाश्च यवगोधूमसर्षपाः ।

मुद्गास्तिलाश्च निष्पावा याम्ये मध्यादिते नव ।।१८८।।

चम्पकोन्मत्तकद्रोणैरशोककुमुदोत्पलैः ।

करवीराब्जजातिभिः पूरयेत् पश्चिमे नव ।। १८९।।

बिल्वाम्रबदरीपूगनालिकेराणि डाडिमम् ।

रम्भापनसजम्बूनि कौबेर्यां पूरयेन्नव ।। १९०।।

नदीह्रदतटाकाब्धिशुभकूपाम्बुकुङ्कुमम् ।

रजनीशालिपिष्टं च भस्म चाप्यनलाष्टके ।। १९१।।

लक्ष्मी देवी हरिक्रान्ता सहा चैकदलाम्बुजम् ।

शक्रवल्ली सदाभद्रा मुसली नैर्ऋताष्टके ।।१९१।।

द्वे तुलस्यावपामार्गो भृङ्गराडपराजिता ।

भीता दमनकं दूर्वेत्युक्तं स्यान्मारुताष्टके ।।१९३।।

ऐशाष्टकं त्वष्टगन्धैश्चन्दनाद्यैस्तु पूरयेत् ।

अथ त्रिकेषु श्रीपर्णी शमी च सदिरं ततः ।। १९४।।

सप्तच्छदं च ककुभमसनं च कदम्बकम् ।

रक्तचन्दनलोध्रे च सरलं सर्जमेव च ।। १९५।।

बकुलं कर्णिकारं च पाटलारग्वधे तथा ।

तमालबिल्वौ धात्री च चतुक्षीरनगा अपि ।।१९६।।

रुद्राक्षं पुत्रजीवं च त्रिकेष्वापूरयेत् क्रमात् ।

मध्ये चतुस्त्रिकाणां तु पूर्वादिक्रमयोगतः ।। १९७।।

मूलं ब्रह्माणि चाङ्गानि मन्त्राः स्युर्दैवतानि च ।

कोणकोष्ठचतुष्कस्य क्ष्मादिमूर्तिचतुष्टयम् ।। १९८ ।।

दैवतं चापि नामानि मन्त्रास्तेषां नमोन्तकाः ।

आपोराजानमाद्यात् प्राग्र याम्ये पुरुषसूक्तत ः ।।१९९

कद्रुद्राद्येन वारुण्यामिमाँ रुद्राय चोत्तरे ।

नवकानां तु मन्त्राः स्युरापो विष्णुश्च पूर्वयोः ।।२००।।

सूक्तयोर्दैवतं चाथ रुद्रः स्याच्छिष्टयोरपि ।

आग्नेयस्याष्टकस्येमाँ रुद्राय स्थिरधन्वने ।।२०१।।

हिरण्यवर्णाः शुचय इत्याद्यं नैर्ऋताष्टके ।

हिरण्यश्रृङ्गमित्याद्याद् वायव्याष्टघटैरपि ।।२०२।।

शन्न इन्द्रादिकं सूक्तमैशान्यामष्टकस्य तु ।

रुद्रश्चापो वरुणश्चेन्द्राग्नी दैवतं क्रमात् ।। २०३।।

एतैर्देवमभिषेचयैदिति यावत् ।

त्रिकाणामथ चाष्टानामिन्द्राग्न्यौरन्तरत्रिकान् ।

प्रारम्याङ्गुष्ठमात्रश्च भुवनेश्वरसंज्ञकः ।। २०४।।

ईशानश्चैकपिङ्गाक्ष उद्भवश्च भवस्तथा ।

महादेवो महातेजा मन्त्रास्तद्देवताश्च ते ।।२०५।।

तारादिनमोन्तानि तत्तन्नामधेयानि मन्त्रा इति यावत् ।

इदंविष्णवादिक चाथ दधिक्राव्णादिकत्रयस् ।।२०६।।

अग्निमीळेतिपूर्वा ऋगिषेत्वेत्यादिकं तथा ।

घृतं मिमिक्षेत्याद्यं च मधुवाता ऋतायते ।। २०७।।

मन्त्राः स्थुर्देवताश्चासामाद्याया विष्णुरुच्यते ।

दध्यादित्रितयस्याप श्रृग्वेदादेस्तु पावकः ।।१०८।।

इषेत्वाद्यस्य सविता घृतादेरपि चानलः ।

मध्वादेः पितरो दैवमाप्यायस्वादिके शशी ।। २०९।।

आकाशेऽर्कश्च सोमश्च यजमानश्च दैवतम् ।

मन्त्राः पुरोवत् पङक्त्यर्णव्योमव्यापिषडर्णकौ ।। २१० ।।

अघोरास्त्रं तथास्त्रं च मन्त्रास्तद्देवता शिवः ।

एभिर्यथाक्रममभिषेचयेदिति यावत् ।

मध्येन शिवकुम्भेन महत्या व्योमविद्यया ।।२११।।

अभिषिञ्चेन्महादेवं देवतास्य शिवः स्वयम् ।

अष्टोत्तरशतस्य

द्विपञ्चाशत्समधिकद्विशतकलशः 252

द्विपञ्चाशत्समधिकद्विशतस्नपनस्य तु ।। २१२ ।।

मध्यकुम्भं यथापूर्वं हेमरत्नकुशाम्बुभिः ।

पूरयेदथ दिक्ष्वष्टनवकान्यपि तद्बहिः ।। २१३।।

चतुष्कोणस्थनवकान्यपीत्यष्टोत्तरं शतम् ।

अष्टोत्तरशतोक्तैस्तु द्रव्यैरेवाभिपूरयेत् ।। २१४ ।।

तैरेव देवतामन्त्रैरथ द्वादशकान्यपि ।

चतुर्दिक्षु क्रमादेभिर्द्रव्यैरद्भिश्च पूरयेत् । २१५ ।।

नन्द्यावर्तं च धुर्धुरं कपित्थं च कदम्बकम् ।

माल्यङ्गश्चैव भद्रा च तद्वद्द्रावणबिल्वकम् । २२६

मरुकं पद्मतुलसी मुण्डी कुरवकार्जके ।

मध्यद्वादशके प्राच्यां सोमकर्पूरवल्लिके ।। २१७।।

कुब्जकं शतपत्रं च कर्णिकारं बकं तथा ।

श्वेतार्कमरुणागस्तिकुसुमं काञ्चनारकम् ।। २१८।।

मल्लिकायुगलं रक्तकरवीरं च दक्षिणे ।

तमालं माधवी श्वेतमन्दारं पाटलद्वयम् । २१९।।

गोक्षुरं भूकदम्बं चाप्यङ्कोलस्य च पल्लवः

बीजपूरस्य कुसुमं लवङ्कस्य च पल्लवः ।।२२०।।

राजार्कः स्वर्णयूथी च प्रत्यग् द्वादशकस्य तु ।

श्वेतपल्लवपुष्पे द्वे श्चेतदूर्वा महामरी ।। २२१।।

कञ्चोरोशीरमुस्ताश्च पलाशकुसुमं ततः ।

सितासितोन्मत्तपुष्पे शेफाली बृहती तथा ।।२२२।।

मध्यद्वादशके सौम्ये द्रव्याणि स्युर्यथाक्रमम् ।

पार्श्वद्वादशकान्यष्टावापूर्य स्वच्छवारिभिः ।।२२३।।

सचन्दनं हिरण्यं च पुष्पाण्यप्येषु निक्षिपेत् ।

अष्टोत्तरशतप्रोक्तैर्मन्त्रैस्तैर्नवकैः क्रमात् ।।२२४।।

एकादशानुवाकैस्तु रौद्रद्वादशकैः शिवम् ।

ऐन्द्रादिकैस्तु संस्नाप्य शिष्टद्वादशकैन तु ।। २२५।।

ब्रह्मभिर्मध्यमं कुम्भं महत्या व्योमविद्यया ।

द्विपञ्चाशदधिकद्विशतस्य ।

त्रिशतकलशः । 300

कलशत्रिशतस्यापि हेमरत्नकुशाम्बुभिः ।। २२६।।

मध्यकुम्भं समापूर्य तद्बाह्यकलशाष्टकम् ।

रत्नाष्टकेन तीर्थाद्भिः समापूर्यास्य बाह्यतः ।। २२७।।

अष्टोत्तरशतद्रव्यैस्तथैवापूर्य मन्त्रतः ।

तत्कोणे नवकान्तःस्थपदानां तु चतुष्टयम् ।।२२८।।

शुद्धाम्भादिभिः पूरयेत् तस्माद् बाह्यलाङ्गलकोणगात् ।

द्विपञ्चाशद्विशतवद् द्रव्यैर्मन्त्रैश्च दैवतैः ।।२२९ ।।

पूरयित्वा तु तन्मध्यनवकानि त्रिकाणि च ।

द्वादशाष्टप्रसंख्यानि हेमाम्भोभिः प्रपूरयेत् ।।२३०।।

त्रिशतस्य ।

अष्टाधिकपञ्चशतकलशः 508

अष्टाधिकपञ्चशते मध्यकुम्भं तु पूर्ववत् ।

सपञ्चरत्नहेमादिभिः समापूर्य यथाविधि ।।२३१।।

बाह्ये विकारकुम्भाश्च तद्बाह्यनवकाष्टके ।

मध्यत्रिकाष्टके चैव सद्वादशश (तान् तं) घटान् ।। २३२

अष्टोत्तरशतद्रव्यैश्चतुर्भिश्चैव पूरयेत ।

तद्बाह्यतस्तु परितो नवकावरणद्वये ।।२३३।।

चत्वारिंशत्प्रसंख्यानि नवकानि भवन्ति हि ।

तेषां तु मध्यकुम्भेषु तावद्रव्याणि निक्षिपेत ।।२३४।।

शिष्टद्रव्यचतुष्केण कोणकुम्भांस्तु पूरयेत् ।

शिष्टांस्तु कलशान् सर्वान् शुद्धाम्भोभिः प्रपूरयेत् ।।२३५।।

सहेमगन्धकुसुमान् मूलेन तु यथाविधि ।

मध्यावस्थकुम्भैस्तु रुद्रेणैवाभिषेचयेत् ।।२३६।।

तद्बाह्ये नवकैः सर्वैः क्रमान्नारायणोदितैः ।

सध्यगथ वल्लीभिरभिषिच्य क्रमेण तु ।।२३७।।

मध्यस्थनवकुम्भेन स्नपयेद् व्योमविद्यया ।

अथवा सर्वकुम्भैश्च संहितामनुभिः क्रमात् ।।२३८।।

ब्रह्मभिः शवगायत्र्या सावित्र्या व्योमविद्यया ।

अभिषिञ्चेद् गुरुर्देवं तत्तत्सूक्तान्यनुक्रमात् ।।२३९।।

अष्टौ मूर्त्तिधरा विप्रा जपेयुः परितः स्थिताः ।

कुशकूर्चैस्तु कलशान् संस्पृशन्तस्तथा शिवम् ।। १४०।।

अष्टाधिकपञ्चशतस्य ।

विंशत्याधिकसप्तशतस्य । 720

अथ सप्तशते विंशत्याधिके मध्यमं घटम् ।

हेमरत्नैश्च शुद्धाद्भिः पूरयेत् संहिताजपात् ।।२४१।।

द्वासप्ततिं तु कलशांस्तद्बाह्ये नवकाष्टके ।

तावद्द्रव्यैः क्रमान्मन्त्रैरष्टोत्तरशतोदितैः ।।२४२।।

बाह्ये द्वासत्पतिव्यूहान् क्रमादावरणत्रये ।

तेषां नवकमध्यस्थकुम्भास्तावन्त एव हि ।। २४३।।

तेषु द्रव्याणि तावन्ति क्रमात् तान्येकशः क्षिपेत् ।

द्रव्यद्वादशकं शिष्टं कोणेष्वावरणत्रये ।। २४४।।

क्रमाद् द्वादशकुम्भेषु शार्वाशान्तं विनिक्षिपेत् ।

मध्यादिकेषु व्यूहेष्वप्येकाशीतिप्रसह्यया ।। २४५।।

व्योमव्यापिपदान्येषु क्रमात् तावन्ति विन्यसेत् ।

तत्तदुद्दिष्टमध्वानं षड्विधं चैषु योजयेत् ।।२४६।।

संपूज्य च विधानेन महत्या व्योमविद्यया ।

अभिषिञ्चेद् गुरुर्देवं रुद्रेण ब्रह्माभिस्तथा ।। २४७ ।।

प्राग्वन्मूर्तिधरा विप्राः कद्रुद्रं पौरुषं ततः ।

श्रीसूक्तं पवमानं च जपेयुः कूर्चपाणयः ।। २४८।।

विंशत्यधिकसत्पशतस्य ।

पञ्चावरणयुक्तस्य सहस्रकलशस्य

पथमावरणस्य

पञ्चावरणयुक्तस्य सहस्रकलशस्य तु ।

गन्धकाञ्चनरत्नैश्च कुशतीर्थजलैर्घटम् । २४९।।

शिवाख्यं पूरयेन्मध्ये तद्बाह्यघटविंशतेः ।

अग्न्यादिकोणकुम्भास्तुं पाद्याचामार्घ्यंगव्यर्कः । २५० ।।

शिष्टान् दुग्धघृतक्षौद्रदधीक्षुफलवारिभिः ।

कषायतोयगोमूत्रपुष्पगोमयकाञ्चनैः ।।२५१।।

पृथग् बिल्वस्य पञ्चाङ्गैः सहाम्भोभिः प्रपूरयेत् ।

द्वितीयावरणस्य ।

अथ द्वितीयावरणे दूर्वायवतिलाम्बुभिः ।।१५२।।

शाल्युत्पलत्रयाम्भोभिश्चतुःक्षीरनगाङ्कुरैः ।

जम्बूशिरीषपालाशसत्पपर्णासनार्जुनैः ।। १५३।।

प्रियङ्गुमाषगोधूममुद्गसर्षपवैणवैः ।

निष्पावकमहाव्रीहिश्यामाकाणुगवीथुकैः ।। १५४।।

मसूरककुळस्थैश्चाप्याढकीभिश्च जर्तिलैः ।

सिद्धार्थैरपि नीवारैः पूरयेत् तु यथाविधि ।। २५५।।

ततो विशुद्धदेशस्थनदीवत्मीकतीर्थजाः ।

षृ (षभे ? षेभ) गिरिश्रृङ्गभयः कुली (रे र) क्षेत्रयोर्मृदः ।।२५६।।

पलाशकुशबिल्वानां क्षीरागानां च मूलतः ।

वेद्या वराहकृ (ष्टैः ? ष्टा) श्च मृदो देवगृहस्य च ।। २५७।।

कुमुदोत्पलपद्मानां मूलेभ्यो मृत्तिकाः पृथक् ।

चम्पकद्वयमुन्मत्तत्रयं वै पाटलं यवम् ।। १५८।।

अशोकद्रोणकुसुमकरवीरचतुष्टयम् ।

पद्मद्वयं च कुमुदद्वयं वै तुलसीद्वयम् ।। १५९।।

शतपत्रं कुब्जकं च माधवी मल्लिकाद्वयम् ।

सप्तकालं च नारं च पुष्पे पुन्नागनागयोः ।। २६०।।

राजार्के धवलार्कं च कल्हारेन्दीवरे तथा ।

सितारुणे च मन्दारे कर्णिकारं महामरी ।।२६१।।

आर्ति कुसुम्भकुसुमं सितकृष्णापराजिते ।

पलाशपुष्पं बकुलं नन्द्यावर्तं कदम्बकम् । २६२ ।।

दमनं पद्मतुलसी मुण्डी कुरवकं तथा ।

हीरिबेरं मरुवकं मुस्ता ग्र (न्थी ? न्थि ?) रुशीरकम् ।। २६३।।

बृहत्यारग्वधौ जम्बूपल्लवं चूतपल्लवम् ।

अरुणागस्तिकुसुममाम्रपुष्पं च चोरकम् ।। २६४ ।।

शेफालीकुसुमं लक्ष्मी सहदेवी कृताञ्जलिः ।

भीतेन्द्रवल्ली मुसलीभद्रे दुर्वाद्वयं तथा।।१६५।।

हरिक्रान्ता भृङ्गराजद्वयं चैकदलाम्बुजम् ।

भूकदम्ब इतीमानि द्वात्रिंशदधिकं शतम् ।। २६६।।

तृतीयावरणस्य ।

तृतियेऽपि च माल्यङ्गं शमीपुष्पं च तद्दलम् ।

अपामार्गः शङ्खपुष्पं तापिञ्छं च तमालकम् ।। २६७।।

ब्राह्मी रुद्रजटा सूर्यवर्तिनी च सुवर्चला ।

वनमाला तथा श्यामा पट्टी रावणबिल्वकम् ।।२६८।।

कर्पूरवल्लिका सोमवल्ली घात्र्यङ्कुरं तथा ।

दूर्वासनप्रसूने द्वे बकपुष्पं तथार्जकम् ।। २६९।।

कुटजं सरलं कुष्ठं चन्दनं रक्तचन्दनम् ।

कुङ्कुमं च मुरं मांसी कर्पूरं चागरुद्वयम् ।। २७०।।

जातीफलं च मञ्जिष्ठा देवदारुश्च रोचना ।

खषं चषालपद्माक्षौ गन्धामलकगन्धकाः ।। २७१।।

एलालवङ्गतक्कोलहरितालमनश्शिला: ।

गैरिकं माक्षिकं काक्षी सिन्दूरं दरदं शिखा ।।२७२।।

अयस्तीक्ष्णमयस्कान्तस्ताम्रं त्रपु च पित्तलम् ।

सीसकं रजतं स्वर्णं वैक्रान्तं चाभ्रकत्रयम् ।। २७३।।

(सौ ? सू) र्येन्दुकान्तौ स्फटिकं लोहं तुत्थं च कांस्यकम् ।

नालिकेराम्रपनसरम्भालिकुचडाडिमाः ।। २७४।।

मातुलुङ्गं च जम्बीरं बैल्वमातुण्डिकाफलम् ।

पूगं च बदरं द्राक्षा नारङ्गामलकीफले ।। २७५।।

मधूकब्रह्मवृक्षौ च श्रीपर्णीखदिरावपि ।

पद्मकं सर्जलाध्रौ च रौहीतकविकङ्कतौ।। २७६।।

बिल्वारग्वधशाकाश्च धात्री चैव हरीतकी ।

जम्बूश्च साराण्येतेषां रत्नानि न पृथक् नव ।। २७७।।

वज्रादिकानि क्रमशो हैमान्यस्त्राण्यथो दश ।

हरिद्रायवगोधूमशालीचूर्णानि भस्म च।। २७८।।

मुद्गमाषकुलस्थानां चूर्णान्यपि च सक्तवः ।

घानाः करम्बाश्चोहुम्बा बला चातिबला तथा ।। २७९।।

समुद्रसिन्धुतीर्थाम्भो वापीकूपतटाकजम् ।

ह्रदनिर्झरतोयं च रुद्राक्षं च यथाक्रमम् ।।२८०।।

इत्थं तृतीयावरणे कलशानां चतुष्टयम् ।

शतं च चत्वारिंशञ्च द्रव्यैरुक्तैः प्रपूरयेत् ।। २८१।।

चतुर्थावरणस्य ।

चतुर्थावरणे चाथ + + + कलशोत्तरम् ।

चतुश्शतं हि कलशान् हेमकर्पूरकुङ्कुमैः ।। २८२ ।।

नादेयैः पूरयेत् तोयैर्गायत्र्या शिवसंज्ञया।

पञ्चावरणसहस्रकलशाधिकारः ।

पञ्चमावरणे तद्वद् द्वासप्ततिशतद्वयम् ।। २८३।।

कुम्भाः स्युस्तान् सकर्पूरचन्दनागरुवारिभिः ।

पूरयेच्छिवसावित्र्या प्रादक्षिण्याद् यथाविधि ।। २८४ ।।

ततः सन्धिस्थकुम्भास्तुं तीर्थतोयेन पूरयेत् ।

त्रियम्बकेन गन्धं च हिरण्यं चैव निक्षिपेत् ।। २८५।।

सर्वत्रावृतिमुम्भानां पूरणे पूजने तथा ।

प्रागादिकं स्यादीशान्तं क्रमोऽयं स्नपनेऽपि च ।। २८६।।

व्यूहानां नवकादीनां प्राग्याम्याप्यैन्दवान्तकम् ।

अग्निरक्षोनिलेशान्तं पूरयेत् स्नपयेदपि ।। २८७।।

ईशानद्यास्तु सद्यान्तं मध्याद्यावरणेश्वराः ।

सदाशिवदयश्चापि शान्त्यतीतादिकाः कलाः ।। २८८।।

अध्वानोऽपि पुनश्चैषु मध्याद्येषु स्थिताः क्रमात् ।

मध्यमे शिवकुम्भे तु सर्वेषु कलशेष्वपि ।।२८९ ।।

स्मर्तव्याः स्युः षडध्वानः समष्टिव्यष्टिमार्गतः ।

सर्वत्रापि च कुम्भेषु स्वर्णे माषमितं क्षिपेत् ।।२९०।।

तदर्धं वाप्यतोऽर्धे वा श्रेष्ठमध्याधमक्रमात् ।

त्रिद्व्येकनिष्कं श्रेष्ठाद्यं मध्ये शिवघटे क्षिपेत् ।।२९१।।

सामान्यं सर्वकुम्भानां गव्यमध्वैक्षवं विना ।

पूरणं शुद्धतोयेन वस्त्रं कूर्चं च काञ्चनम् ।।२९२।।

पल्लवानि पिधानं च गव्यादीनां च तत् समम् ।

मध्यमव्यूहस्य ।

अष्टोत्तरसहस्त्रस्य प्राग्वाच्छिवघटं जलैः ।।२९३।।

सरत्नहेमगन्धैस्तु समापूर्य यथाविधि ।

पूर्वादिदिक्पञ्चकेषु द्रव्यैर्विंशंतिभिः क्रमात् ।।२९४।।

पूर्ववत् पूरयेन्मन्त्रैः पञ्चकान्यानलादिषु ।

शुद्धाम्भोभिः सकर्पूरैः पूरयेत् कुसुमान्वितैः ।।२९५।।

द्वितीयव्यूहस्य ।

बाह्ये द्वितीयव्यूहे तु विकारनवकानि तु ।

तृतीयावरणप्रोक्तैर्माल्यङ्गाद्यैः प्रपूरयेत् ।।२९६।।

अष्टोत्तरसहस्त्रकलशानाम् । (तृतीयव्यूहस्य)

अथ तृतीयव्यूहे तु चतुर्दिङ्नवकानि तु ।

दूर्वादिनीवारान्तैस्तु द्वितीयावरणोदितैः ।।२९७।।

पद्माक्षरुद्राक्षाभ्यां च तत्त्वद्रव्यैस्तु पूरयेत् ।

शिष्टाशीतिप्रसंख्यानां नवकानां यथाक्रमम् ।।२९८।।

मध्यमुम्भांस्तु तावद्भिर्द्वितीयावरणोदितैः ।

नदीमृदादिकैर्द्रव्यैः पूरयेद् व्योमविद्यया ।। २९९।।

अष्टद्रव्यैस्ततः शिष्टैर्द्वारकुम्भान् यथापुरम् ।

आपूरयेत् तु मूर्तीशमन्त्रैरष्टाभिरेव तु ।।३००।।

चतुरावरणसहस्त्रकलशाधिकारः । (चतुर्व्युहस्य)

चतुर्व्यूहेऽपि मध्यस्थमुम्भं प्राग्वत् प्रपूरयेत् ।

ततस्त्रयाणं व्यूहानां दिक्कोणान्तांस्तु दिक्स्थितान् ।।३०१।।

व्यूहेषु लाङ्गलाभेषु कलशान् पूर्ववत् क्रमात् ।

पूर्वोक्तद्रव्यमन्त्रैश्च सन्धिस्थानपि पूरयेत् ।।३०२।।

पञ्चावरणवत् सर्वे देवताध्वादिकं स्मृतम् ।

एकविंशतिव्यूहस्य ।

एकविंशतिके व्यूहे मध्यकुम्भं च तद्बहिः ।।३०३।।

विंशतिं मध्यमव्यूहे प्राग्वद् द्रव्यैस्तु पूरयेत् ।

एद्बाह्यविंशतिव्यूहमध्यस्थकलशांस्ततः ।।३०४।।

दूर्वादिविंशतिद्रव्यैर्गोधूमान्तैः प्रपूरयेत् ।

ततोऽष्टदिक्षु व्यूहानां बाह्यावरणगान् घटान् ।।३०५।।

अष्टाविंशतिसंख्यांस्तु प्रतिव्यूहं क्रमेण तु ।

मुद्गादिभिस्तु तावद्भिरुक्तैर्द्रव्यैः प्रपूरयेत् ।। ३०६।।

अन्तर्व्यूहचतुष्कस्थकुम्भान् कुङ्कुमवारिभिः ।

सहिरण्यैः समापूर्य पार्श्वव्यूहाष्टकं बहिः ।। ३०७।।

गोमूत्रगोमयक्षीरदध्याज्यैक्षवमाक्षिकैः ।

नालिकेरपयोभिश्च क्रमेणैवाभिपूरयेत् ।।३०८।।

अथाष्टदिक्षु व्यूहानामन्तरा प्रतिविंशतेः ।

चतुष्कोणस्थकलशाञ् शिष्टैर्द्रव्यैस्तु पूरयेत् ।। ३०९ ।।

सहस्त्रकलशानां देवतानि च मन्त्राश्च ।

सहस्त्रकलशानां तु पृथगावरणक्रमात् ।

दैवतानि च मन्त्राश्च कथ्यन्ते क्रमशोऽधुना ।। ३१० ।।

नवव्यूहादिकानां च व्यूहैरावरणानि तु ।

पञ्चधा पृथगूह्यानि पञ्चावरणवत् क्रमात् ।।३११।।

मध्यस्थशिवकुम्भस्य दैवतं हि सदाशिवः ।

ब्रह्माङ्गानि च मूलं च मन्त्राः स्युर्व्योमविद्यया ।। ३१२।।

गर्भावरणकस्याथ देवतास्त्वष्टमूर्तयः ।

द्वितीयावरणस्यापि वामाद्याः शक्तयः स्मृताः ।। ३१३।।

तृतीयस्य तु मूर्तीशाः शर्वाद्या देवताः स्मृताः ।

चतुर्थावरणस्याथ दैवमङ्गुष्ठमात्रकम् ।। ३१४।।

भुवनेशान ईशान एकपिङ्गेक्षणस्तथा ।

उद्भवश्च भवश्चाथ महादेवो महाद्युतिः ।।३१५।।

पञ्चमावरणस्याथ शतरुद्धदशादिगाः ।

कपालीशोऽग्निरुद्रश्च याम्यो निर्ऋतिसञ्ज्ञकः ।। ३१६।।

बलः शीघ्रो निधीशश्च विद्याधिपातेरष्टमः ।

एतेऽष्टदिक्स्थव्यूहानामधिदेवाः क्रमात् स्मृताः ।।३१७।।

द्वारशोभोपशोभादौ विघ्नेशा रक्षकाः स्यिताः ।

पाद्येनेदंविष्णुराद्यादापोहिष्ठेत्यनन्तरम् ।। ३१८।।

आपः पुनन्त्विवर्घ्येण चाग्निमीळेति गव्यतः ।

इषेत्वेति घृतेनापि मधुना मघुवाततः ।।३१९।।

आप्यायस्वेति दुग्धेन दधिकावणादिना दधि ।

उपत्वाग्नेतीक्षुरसान्मानस्तोकात् करम्भकैः ।।३२०।।

अश्वावत्या कषायद्भिः सुमित्रानेति लाजकान् ।

अग्न आयाहि धानाभिः पुष्पावत्या तु पुष्पकैः ।। ३२१।।

समुद्रज्येष्ठतश्चापि ब्रह्मजज्ञानतोऽपि च ।

हरिद्रादिभश्च सक्त्वद्भिरभिषिच्चेन्महेश्वरम् ।। ३२२।।

रक्षोहणेन सिद्धार्थैः शन्नोदेव्या तिलाम्भसा ।

वास्तोष्पतेतिशाल्यार्द्भिदुर्वाद्भिश्चाग्नेति वै । ३२३ ।।

पद्माम्भोभिः श्रियैजातात् त्रिष्टुभा चोत्पलाम्बुभिः ।

आशुश्शिशानआद्येन स्त्रपयेन्मृत्तिकाम्बुभिः ।।३२४।।

श्रीसूक्ताद् गन्धतोयैस्तु कदुद्रेण फलाम्बुभिः ।

चमकेन तु धान्यादि्भः सारादि्भः पौरुषेण तु ।। ३२५।।

आपोराजानमाद्येन स्नपयेद् रत्नवारिभिः ।

त्रैयम्बकेन भस्मादि्भरिमां रुद्राय कूप (पै जैः) ।।३२६।।

कनिक्रदाद्याल्लोहादि्भरीशानान्निर्झराम्बुभिः ।

पुरुषेण तटाकादि्भरघोरेण समुद्रगात् ।।३२७।।

वामदेवेन नद्यदि्भरजातेन ह्रदाम्बुभिः ।

तीर्थैरिमं मे गङ्गेति गन्धद्वारेति गोमयात् ।।३२८।।

ओषध्यदि्भस्तु रुद्रेण स्वस्त्याद्येनाङ्कुराम्बुभिः ।

पवमानैः कुङ्कुमादि्भः सावित्र्या घनसारकैः ।। ३२९।।

हिरण्यवर्णाः शुचय इत्याद्येन कुशाम्भसा ।

यासं राजेति मन्त्रेण विल्वपञ्चाङ्गवारिभिः ।। ३३०।।

यासां देवेति मन्त्रेण गोमूत्रेणाभिषेचयेत् ।

शिवेन मा चक्षुषेति स्नपयेत् पल्लवाम्बुभिः ।। ३३१।।

स्नपयेद् धातुसलिलैः पवमानःसुवर्जनात् ।

जातवेदः पवित्राधैरनुवाकान्ततः क्रमात् ।।३३२।।

यवमाषादिभिश्चूर्णैः स्नपयेद् घर्षयेत् तथा ।

अम्भस्यपार इत्याद्याद्धैमास्त्रसलिलैरपि ।। ३३३।।

तरत्समन्दीत्याद्येन रुद्राक्षसलिलैस्ततः ।

अभिषिञ्चेन्महादेवं पुष्पधूपजलान्तरम् ।।३३४।।

प्रारभ्य गर्भावरणादावाह्यावरणान्तकम् ।

क्रमेण दिग्विदिग्योगात् कलशैः स्नपयेच्छिवम् ।। ३३५।।

एकैकावरणव्यूहनवकंस्नपनादनु ।

स्नपयेच्छिवगायत्र्या सपुष्पैः शीतवारिभिः ।। ३३६।।

पुष्पधूपार्चितं कृत्वा स्नपयेच्च पुनः पुनः ।

आसमाप्तेस्तु कुम्भानां स्नपयित्वोदितक्रमात् ।।३३७।।

मार्जयेन्मार्जनन्द्रव्यैरीशानेन तु चोदितैः ।

ब्राह्मीं च वैष्णवी रौद्रीं विमला च कृताञ्जलिम् ।।३३८।।

रजनी सहदर्वी च शिरीषं सूर्यवर्तिनीम्।

सदाभद्रां कुशाग्राणि मिलित्वा मार्जयेच्छिवम् । ३३९।।

पञ्चादशद्दर्भकूर्चेन शन्नइन्द्रादिना ततः ।

संप्रोक्ष्य स्नपयेञ्चाद्भिः कुर्यान्नीराजनं ततः ।। ३४० ।।

शालिपिष्टादिविहितैर्हेमामत्रादिषु क्रमात् ।

देवाष्टमङ्गलैश्चान्यैर्लोकपालयुधैरपि ।। ३४१ ।।

उच्चैः पिष्टप्रदीपैश्च दूर्वासिद्धार्थपङ्कजैः ।

दध्यक्षतैश्च सुन्यस्तैः पुंसा नीराजयेद् विभुम् ।। ३४२ ।।

संगीतनृत्तवादित्रैः शङ्खकाहलगोमुखैः ।

तिमिलानकभेर्याद्यैर्निनदद्भिरनारतम् ।। ३४३।।

वेदघोषैश्च मुर्च्छद्भिर्जयशब्दादिमङ्गलैः ।

नीराज्य तद्वत् स्नपयेत् ततो मध्यघटेन तु । ३४४।।

अभिषिच्याथ शुद्धेन वाससा परिमार्जयेत् ।

ततः सुसूक्ष्मैरहतरौ (क्ष्णैः ? र्णैः?) कार्पासिकैरपि ।।३४५।।

परिधाप्य च मूलेन पाद्यं दद्यादथेशतः ।

हृदयेन मुखेष्वर्घ्यं नेत्रेणाचमनं तथा ।। ३४६।।

दत्त्वा विभूषणैर्हैमैर्नानारत्नविचित्रितैः ।

मकुटाद्यैर्यथाशोभं पिण्डिकाभूषणान्तकैः ।। ३४७।।

आभुषयेत् तु वक्त्रेण रूपिणाचामयेदपि (?)

चन्दनेन सुपिष्टेन सकर्पूरहिमाम्भसा ।। ३४८ ।।

कुङ्कुमागरुमिश्रेण लिम्पेद् गन्धेन वामतः ।

पुष्पैरपि च मालभिरलङ्कुर्यादजातत: ।। ३४९।।

असितागरुकपूर्रपूरैस्तु सितयान्वितैः ।

घूपयेच्छिखया शम्भुं दीपं दद्याञ्च वर्मत: ।। ३५०।।

सकर्पूरदशैर्दीपैः सुगन्धाद्यैः प्रदीपितैः ।

आरात्रिकमथास्त्रेण भ्रमयित्वावतारयेत् ।। ३५१।।

नैवेद्यमथ सुस्वादु सिद्धं कलशसम्मितैः ।

शालिजैस्तण्डुलप्रस्थैस्ततोऽर्धैर्वाप्यतोऽर्धत: ।।३५२।।

श्रेष्ठादिकं निवेद्यं स्यात् तद्युक्ताज्याधिकप्लुतम् ।

पायसं चाथ दध्यन्नं सहरिद्रं सुसाधितम् ।। ३५३।।

कृसरान्नं गुलान्नं च मुद्गान्नं च यथाक्रमम् ।

ईशानादिमुखाग्रेषु प्राज्याज्याक्तं निवेदयेत् ।। ३५४।।

सर्वत्र दधिमध्वाज्यसितोपलरसोत्तरम् ।

ससूपं सूपदंशाढ्यं समूलफलमोदकम् ।। ३५५।।

निवेदयीत शर्वाय तोयं शीतं सुगन्धि च ।

लवङ्गजातितक्कोलकर्पूरैलान्वितं जलम् ।।३५६।।

हस्तावसेचनं दत्त्वा प्रदायाचमनं तथा ।

सजातिफलतक्कोलकर्पूरक्रमुकान्वितम् ।। ३५७।।

ताम्बूलं विनिवेद्याथ स्तुत्वा नत्वा च भक्तितः ।

शिवं प्रदक्षिणीकृत्य चाग्निं संरुध्य वै क्रमात् ।। ३५८।।

वह्निस्स्थं च शिवं कुंम्भे कुम्भस्थं हृदि योजयेत् ।

विसृज्य द्वारलोकेशान् भोजयेद् गुरुमुर्तिपान् ।। ३५९ ।।

अध्येतृन् परिचारांश्च ब्राह्मणान् लिङ्गिनस्तथा ।

दीनान्धकृपणार्दीश्चाप्यन्यानन्नाश्रितो जनान् । ३६० ।।

मृष्टान्नाज्यैस्तु सन्तोष्य प्रतिष्ठोक्तक्रमेण तु ।

तोषयेद् दक्षिणाभिश्च वसनाभरणादिभिः ।। ३६१।।

गोभिर्ग्रामैर्गजाश्वाद्यैः सन्तर्प्याथ प्रसन्नधीः ।

यजमानः सहाचार्याः क्षालिताङ्घ्रिकराननः ।। ३६२।।

स्वाचान्तोऽन्तः प्रविश्येशं नमस्कृत्य प्रसाद्य च ।

सगन्धदूर्वाकुसुमं जलं संगृह्य पाणिना ।। ३६३।।

स्नपनार्चनदानादेः फलं निरवशेषतः ।

निवेदयीत शर्वाय श्लोकेनाने पादयोः ।। ३६४।।

ऑ

वित्तशाठ्यविहीनेन भक्त्या शक्त्यानुरूपतः ।

स्नपितः पूजितश्च त्वं दत्तं देयं च यन्मया ।। ३६५ ।।

तत् सर्वं मम देवेश ! प्रसन्नस्त्वं सहाम्बया ।

प्रतिगृहीष्व तञ्चेदं ममास्तु फलसाधकम् ।। ३६६ ।।

इत्यर्पयेद् बुभुक्षुश्चेन्मुमुक्षुरपि तत् तथा ।

त्वप्रसादेन कर्मेदं मास्तु मे नाथ! बन्धकम् ।।३५७ ।।

इति देवस्य पादाब्जद्वये कर्म समर्पयेत् ।

इति ह् निगदितोऽयं शैवसिद्धान्तसिद्धो ।

दशशतकलशादिर्नन्दकुम्भावसानः ।

स्नपनविधिरुदारः श्रीमतश्चन्द्रमौले -

रभिमतपुरुषार्थप्रार्थनाकल्पवृक्षः ।। ३६८।।

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे ।

स्नपनपटलः पञ्चाशत्तमः ।।)[55]

Notes

1. MS No. 5436 B Folio No. 51

2. Ibid Folio No. 51

3. Ibid Folio No. 51
4. Ibid Folio No. 51
5. Ibid Folio No. 54
6. Ibid Folio No. 54
7. Ibid Folio No. 54
8. Ibid Folio No. 55
9. Ibid Folio No. 53
10. Ibid Folio No. 53
11. Ibid Folio No. 53
12. Ibid Folio No. 53
13. Ibid Folio No. 53
14. Ibid Folio No. 53
15. Ibid Folio No. 53
16. Ibid Folio No. 53
17. Ibid Folio No. 53
18. Ibid Folio No. 53
19. Ibid Folio No. 53
20. Ibid Folio No. 53
21. Ibid Folio No. 55

22. Ibid Folio No. 55

23. Ibid Folio No. 55

24. Ibid Folio No. 55

25. Ibid Folio No. 55

26. Ibid Folio No. 55

27. Ibid Folio No. 55

28. Ibid Folio No. 56

29. Ibid Folio No. 56

30. Ibid Folio No. 56

31. Ibid Folio No. 56

32. Ibid Folio No. 56

33. Ibid Folio No. 56

34. Ibid Folio No. 56

35. Ibid Folio No. 56

36. Ibid Folio No. 56

37. Ibid Folio No. 57

38. Ibid Folio No. 57

39. These slokas are found on only in the previous editied version not in MS No.5436B

40. ORI MSSL, MS No. 5436 B Folio No. 57

41. Ibid Folio No. 57

42. Ibid Folio No. 57

43. Ibid Folio No. 57

44. Ibid Folio No. 58

45. Ibid Folio No. 58

46. Ibid Folio No. 59

47. Ibid Folio No. 58

48. Ibid Folio No. 59

49. Ibid Folio No. 59

50. Previous edited version

51. ORI and MSSL, MS No. 5436 B Folio No. 60

52. Ibid Folio No. 60

53. Ibid Folio No. 60

54. These slokas are found on only in the previous edited version not in MS No.5436B

55. From sloka 85 to 368 only the study of previous edited version.

Part III

Kalaśavidhi - A Study

Kalaśakriya is one of the prominent and generally accepted form of worship in Dakṣṇinācāra. Especially, we can see the specialisation of these *Tāntric* rites all over in the temples of Kerala. It is an unavoidable part of temple worship. The Kalaśa performed only in special occasions, Kalaśas are done through certain specific and complicated Kriyas. Kalaśa ceremony is one of the powerful and authoritative part of the Bāhyārādhana. Pīṭpapūja, Mūrtikalpana, Mūrtyāvāhana, Snāna, Mūghapūja or Naivedya and Prasannapūja are the normal steps of idol worship. In the particular time of snāna normally the śánkha Tīrtha accompanied with Apohiṣṭādi ṛgmantra sprinkled three times to the vigraha. This is the miniature and symbolic form of the Snāna Kriya. The Abhisecana and Kalaśa, both are not same. Abhisecana denotes the cleaning process of the idol only the daily basis before starting the proper puja. Oil (gingelly), Īñja, water, milk, tender coconut etc are generally used to the Abhiṣekakriya. But Kalaśa, which is performed only in specific occasions. When the invocation of the deity is over then the priest conduct the Snana or Kalaśa process in respective manner as per the special rites indicated. Kalaśas are performed only the special

circumstances like Anuñjā, Bimbaśudhi, *Nityotsava, Nitya Naimittika Kriya, Pryāścitta, Homas, Udayāsthamanapūja,* Utsavas and some other expeatory rites. Authentic *Tāntric* Texts like Prayogamañjari, Tantra Paddhati or Īsanaśivagurudeva Paddhati, Kalaśachandrika, Viṣṇnusamhita, Tantra Samuccaya etc are states the various rites of Kalaśas. Generally conduct this in major and minor temples from one to thousands Kalaśas are performed in each occassions. Aṅkurārpaṇa is the first procedure of Kalaśakriya. The Kalaśas ceremony may prolong 1 to 15 days based on the number of Kalaśas to be performed in a specific rites.

According to the *Tāntric* version the Kalaśa rites is not only the part of the expeatory rites but it is increases the power of the chief deiety of the temple installed in the sanctom sanctorum. In other word these distingtive rites to enrich and stimulates the 'Kalās' of the particular chief deity. For this, several precious materials, Ayurvedic Medicinal plants are used in proper. As per the *Tāntric* mode, all the Kalaśa Draviyas are classified as per the categorisation of deities whether it is śaiva, Vaiṣṇava and śākta.

Pañjagavya, Kaṣāya, rare āyurvedic herbs, roots of plants, Ayurvedic chūrṇas, gems like pavizha, gomedaka, indranīla etc different medicinal sands like Anakombathetu, (tusk of elephant), Kālakuthiyath, (ploughed up with born by ox) Puttupodi/valmīka etc metal like Gold, Silver etc, kinds of fruits, kaṇḍiveṇṇa,

gorocana, verukinmada, kastūri, skin of precious trees etc are the materials for using for the Kalaśas. Moreover, along with the kalaśapūja performance some other rites are also performed. During the Kalaśapūja accompanied by some precussion instruments like pāṇi, marappāṇi, pañcavādya, maddala, timila, śankhu, chēṅgila etc are using very systamatically and rhythmically. These instruments are also performed while the time of the procession of Brahma Kalaśa and the time of Kalaśābhiṣeka. Before the kalaśa begings, the floor of the temple maṇḍapa is properly sanctified and designed called padma is drawn in particular geometry. Above this, the pots to be used for Kalaśapūja are installed as per the rites.

Kalaśavidhi of *kriyāpāda* in *Īsānaśivagurudevapaddhati* deals with different kalaśas namely *Alapasnapanapadādhikāra, Pañcavimśati Kalaśādhikāra, Trividha Aṣṭotara Kalaśādhikāra, Dvipañcasatādhika śata dvaya Kalaśādhikāra, Triśata kalaśādhikāra, Caturadhikaśata Kalaśādhikāra, Vimśatyadhika saptaśata Kalaśādhikāra, Pañcāvaraṇe sahasra Kalaśādhikāra, Aṣṭottara Sahasra Kalaśādhikāra, Caturāvaraṇe Sahasra Kalaśādhikāra, Ekavimśati Vyūha Sahasra Kalaśādhikāra, Sādhāraṇa Karmādhikāra, Kalaśa bhedena dravyādibheda, Pañcāvaraṇa Sahasra Kalaśādhikāra, Sahasra Kalaśe Mantra dravya devatā Vidhi and Snapanānta kāryavidhi.*

Padma[1] is to be drawn in the *Maṇḍapa*, sanctified as stated above, the size and design of which is determined by the number of Kalaśas. There will be as many Padmas as there are Kalaśas. Ḥalf of each *Pāda* (square) of the Padma is filled with *Sitacūrṇa* (white grain powder) and Salīnāmadhakam. The Padmas have then to be spread with rice, Tila, Lāja, paddy grains and on top of it Darbhāsana arranged. On the base so set, the Kalaśas washed and smoked as per Vidhis may be placed with *Kūrca*[2] (made of Darbha) inside then after which the *Acārya* and his disciples should perform detailed *Pūjas (Nivedyānta*) with the respective Mantras for each Devatas beginning with propitiation of Guru Ganapati. Specific Mantras are mandated for each Dravya of the Kalaśas. The Kalaśas made may then be covered with appropriate clothes and decorated with garlands of flowers. Associated with the *Vidhis, Homa* with *Samit, Ghṛta, Havis, Lāja, Siddhārtha, Tila* and *Yava*. The more the number of Kalaśas, the more the number of Kalaśamantras too. The above description in the Sāmānyavidhi of Kalaśas.

The author then provides details on the Kalaśas beginning with Navaka, their order of performance, related Mantras, materials used, where to assign them, their mode of worship, on the authority of the renowned *Tāntric* text śivatantra.

Materials for Navaka-*Māṇikyam, Mouktikam, Vajra, Pravāla, Hariṇmaṇi, Puṣyarāga, Vaidūrya, Indranīla* and *Gometaka*[3] . Each one of these Navaratnas may be placed in nine Kalaśas filled with *Jala, Gandha, Puṣpa and Dàrbha*. The mode of arrangement of Kalaśas and related Mantras are provided in the Slokas of this Paṭala.[4]

Materials for a set of 25 Kalaśas- 25 Dravyas are used in 25 *Kalaśas*, they are: Pañcaratna in water in *Brahmakalaśa, Pañcagavya, Ghṛta, Madhu, Kṣīra, Dadhi, Ikṣūrasa, Phalāmbu, Kaṣāyajala, Siddhārtha, Lāja, Gandhāmbu, Puṣpāmbu, Hemāmbha* (gold with water), *Padmarāga* with water, water with *Mukta, Yavajala, Pravālajala, Tilajala, Durvā, Utpala, Kuśajala* and *śalyambha.* Separate Mantras and Abhiṣekavidhis are mandated for each material.[5]

Materials for a set of 49 Kalaśas-Brahmakalaśa with Svarṇa, Ratnā, Gandhā, and the other materials are (*Pādyārghyas) Pañcagavya, Ghṛta, Madhū, Kṣīra, Dadhi, Caṅdanā, Agarū, Karpūra, Kumkuma, Uśīrajalas, śāstas, Pañcadhānya, Utpalapuṣpa, Kalhāra, Padma, Utpalapuṣpa (white), Mallika, Jāti, Campaka, Pātāla, Karavīra,* etc. Separate Mantras and Abhiṣekamantras are stipulated in this part[6]

Materials for a set of 81 Kalaśas-Madhyakalaśa-Ratnapañcaka, Svarṇa, Ratnā, Gandhā.

Parikalaśa-Nadījala, Pañcagavya, Ghṛta, Madhu, Kṣīra, Dadhi, Pañcaratnas, Caṅdana, Akil, Gorocana, Karpūra, Māmsīgrandhi (Mānci), Murā, many types of sand (sand ploughed up with horn by ox, tusk of elephant, sand from the river bed, sand from mountain, sand from the lakes, Valmīka, sand from the whirlpool [Kulīrahṛt]), Catukṣīra, Vilva, Amṛa, Aśokapuṣpa, Madhuka, Jambuja, Kadalī fruit, Panasaphala, Amṛaphala, Mātulaṅga, Dāḍima, Jambīra, Likuca, Nālīkera, Jāmbava, water from the sea, river, lake and well, Haridra, Lāja, Kusumāmbhas, Nīvāra, Mudgā, Māṣa, Siddhārtha, Yava, śāli, Tilā, Priyaṅkū, Harikrānta, Musali, Bhṛngarājaka, Sadābhadra, Cakravalli, Bhīta, Ekadalāmbuja, Padmadvayā, Kumudadvaya, Utpalatraya, Indīvara and Kalhāra. Specific and separate Mantras are prescribed for each Kalaśadravya.[7]

Materials for a set of 108 Kalaśas-Materials for *Brahmakalaśa- Ratnā, Svarṇa and Darbha.*

Parikalaśas-Nyagrodha, Udumbara, Aśvatha, Plakṣa, Jambu, Palāṣa, śirīṣa, Bilva, Madhuka, Saptaparṇa, Arjuna, Ikṣu, Kṣoudram, Tila, Pañcagavya, Kuśamūla, Aṣṭhamṛttikā (eight kinds of sands), śāka, Priyaṅku, Māṣa, Yava, Godhūma, Sarṣapa,

Mudgā, Campaka, Unmattā, Droṇa, Aśoka, Kumudā, Utpalā, Karavīra, Abjā (lotus of various colours),Bilva, Amṛa, Badarī), Pūga, Nālīkera, Dādima, Rambhāphala, Panasa, Jambu, water from *Nadī, Hṛda, Taṭāka, Abdhī, Kūpa, Kumkumā, Rajanī, śālīpiṣṭha, Bhasmā, Lakṣmīdevi, Harikrānta, Ekadalāmbuja, Sakravallī, Sadābhadrā, Musalī, Tulasī (two types), Avāpamārga, Bhṛṅgarāja, Bhīta, Damanakā, Durvā, Aṣṭagandhā, Candana, Srīparṇī, Samit, Khadirā, Saptacchada, Kukubhamāsana, Kadambaka, Raktacandana, Laghram, Sarala, Bakula, Karṇikāra, Pātāla, Aragvadha, Tamāla, Bilvā, Dhātri, Catukṣīra, Rudrākṣa* and *Putrajīvam*. Specific Mantras and Abhiṣekavidhis are prescribed for each Dravya[8] .

Materials for a set of 252 Kalaśas- *Brahmakalaśa-* water with *Svarṇa, Ratna,* and *Darbhajala; Parikalaśas-Navakas* and all other materials are as stipulated in 108 Kalaśas. In addition certain other special materials are also provided. They are *Nandyārvarta, Dardhura, Kapittha, Kadambaka, Mālyaṅgam, Bhadra, Drāvaṇa, Bilvuka, Maruka, Padmatulasī, Muṇḍī, Kuravaka, Abjaka, Karpūravallika, Kubjam, śatapatra, Karṇikāra, Bakā, śvetārkam, Aruṇa, Kañcanārakam, Mallīkam, Raktakaravīram, Tamalam, Mādhavī, śvetamandāram, Pātāla, Gokṣuram, Bhūkadambam, Aṅkolapallava, Rājārka, Svarṇayudhi, śvetapallavapuśpa, śvetadurva, Mahāmari, Kañcora, śiramuṣṭi, Palāśakusuma,*

Sitāsita, Unmattapuṣpa, Śephāli, Bṛhati, Candana, Svarṇa and Puṣpajala. The Mantras for the above *Kalaśavidhi* are the same as for the set of 108 *Kalaśas,* except for *Brahmakalaśa*[9]

Materials for a set of 300 Kalaśas-Brahmakalaśa-water with *Svarṇa, Ratna* and Darbha; Parikalaśas- Kalaṣaṣṭhakam (water with eight types of Ratnas). The rest of the Kalaśas are mandated to be filled with materials, their position, related Mantras in exactly the same way as described in 108 and 252 sets.[10]

Materials for a set of 508 Kalaśas- Brahmakalaśa-water with Pañcaratna and gold; Parikalaśas-Vikārakumbhas, Navakas (different sections), Aṣṭhadravyas. The next outer arrangement of the Kalaśas are ordained as in the 108 type; and the next two layers of Navaka; and Suddhāmbhas are stipulated as follows.[11]

Materials for a set of 720 Kalaśas-Brahmakalaśa-water with Svarṇa, Ratna; Parikalaśas-72 Kalaśas, Navaka layers and different Vyūhas[12]

Materials for a set of Sahasrakalaśa

Pañcāvaraṇa type - it is arranged in five outer layers (Avaraṇas) around the Brahmakalaśa. Madhyakumbha or Brahmakalaśa filled with Gandhajala, Svarṇa and Ratnas.

First Avaraṇa - Pādyācamanarghyas, Pañcagavyas, Kṣīra, Ghṛta, Kṣoudra, Dadhi, Ikṣujala, Bhalāmbu, Kaṣāyajala, Gomūtra, Puṣpajala, Gomayajala, Svarṇa, Bilvapatra, and the like.

Second Avaraṇa - Durvā, Yava, Tila, śāli, Utpalapuṣpa (three types), Catukṣīra, Nagāṅkura, Jambūphala, Sirīṣam, Palāśa, Saptaparṇa, Arjuna, Priyaṅku, Māṣa, Godhūma, Mudga, Sarṣapa, Vaiṇava, Niṣpāvaka, Mahāvṛīhi, śyāma, Māsura, Kakkula, Aṭhathaki, Tila, Siddhārtha, Nivīram, water from holy rivers, different types of sand (as described in 81 Kalaśas), Palāśa, Kuśa, Bilvapatra, Kṣīragaṇam, sand ploughed up with the tusks of Varāha (wild pig), sand taken from Devagṛha (temple), sand taken from around the root of Kumuda and Utpalapuṣpa; Campakadvayam, Unmatta (three types), Pātāla, Yava, Aśoka, Droṇa, Karavīra (four types), śvetapadma, Mādhavī, Tulasī (two types), Kubjakam, Mallikādvayam, Saptakala, Nāram, Punnāga, Nāgāpuṣpa, Rājārkka, Dhavalārka, Kalhāra, Indīvaram, Sita, Aruṇa, Maṅdāra, Karṇikāra, Mahāmari, Kusumbhakusuma, Sita, Kṛṣṇa, Pārijāta, Palāśapuṣpa, Bakula, Nandyārvartta, Kadambaka, Damanaka, Padmatulasī, Muṇḍi, Kuravaka, Hiriberam, Maruvakam, Mustagandhī, Uśīraka, Bṛhati, Aragvadha, Jambūpallava, Cūtapallava, Aruṇāgattipuṣpa, Corakam, Sephālika, Lakṣmī, Sahadevī, Kṛtāñjalī, Bhīta, Indravallī,

Musalī, Bhadra, Durvā, Harikrānta, Bhṛngarāja, Ekadalapadma, and Bhūkadamba.

Third Avaraṇa - Mālyaṅgam, śamīpuṣpa, Apāmārga, śaṅkhapuṣpa, Tāpiñjam, Tāmalāka, Brāhmī, Rudrajadā, Sūryavartinī, Suvarcala, Vanamāla, śyāma, Paṭṭī, Rāvaṇa, Bilvaka, Karpūravallikā, Somavallī, Dhātṛyañkuram, Durvāsanaprasūna, Bakapuṣpa, Arjaka, Kudaja, Sarala, Kuṣṭa, Caṅdana, Raktacandana, Kumkuma, Murā, Māmsī, Karpūra, Agarū, Jāti, Mañjiṣṭa, Rocana, Khasa, Casala, Padmākṣa, Gandhamālāka, Gandhakā, Elā, Lavaṅga, Takkola, Hārita, Gamana, śila, Gourika, Mākṣika, Kākṣi, Sindhūra, Dvarāvha, śikha, Nālīkera, Amṛa, Panasa, Rambhāphala, Likuca, Jambīra, Mātuṇḍikāphala, Madhuka, Brahmavṛkṣa,, Srīparṇī, Padma, Sarojalodhra, Rouhita, Kaṅgata, Kāvi, Hārātaki, Saraṇī, Ratnas, Cūrṇas (Haridrā), Yava, Godhūm, śāli, and Bhasma), Māṣa, Kula, Karmba, Gotumba, Balā, Atibalā, Tīrtthajalās like Samudra, Kūpa, and Nadījalas, and Rudrākṣa.

Fourth Avaraṇa - The details of the fourth Avaraṇa is uncompleted in the original. Svarṇa, Karpūra, Kumkuma, and Nādeya (with Jala) filled in 400 Kalaśas.

Fifth Avaraṇa - 272 Kalaśas filled with Karpūra, Caṅdana, Agarū, Tīrthas, Gandhas and Svarṇa.

The materials filled up in the Kalaśas may be offered along with the respective stipulated Mantras. The specific Mantra for each Dravyā is clearly provided by the author,

In addition to the Pañcāvaraṇasahasrakalaśas, there are Vidhis for Aṣṭottarasahasrakalaśas and Caturāvaraṇasahasrakalaśas. On competion of Abhiṣeka with each Avaraṇa, Puṣpadhūparcana is mandated to the accompaniment of Nṛtta-Gīta-Vādya-Jayaghoṣas.

संगीतनृत्तवादित्रैः शङ्खकाहलगोमुखैः।
तिमिलानकभेर्याद्यैर्निनदद्भिरनारतम्।
वेदघोषैश्च मूर्च्छद्भिर्जयशब्दादिमङ्गलैः।
नीराज्य तद्वत्स्नपयेत् ततो मध्यघटेन तु।।[13]

Beginning with the outer Avaraṇas, Abhiṣeka is performed culminating with Brahmakalaśa at the centre after which the Deva is offered Pādya-Arghyā-Acamanā and embellished with Aṅgavastra, Bhūṣana and the like in strict adherence to custom-followed by smoking with Karpūrādi divyacūrṇas along with detailed Pūja with Mahānivedya (the number of Nivedyas will increase with the increase in number of Kalaśas.)[14]

The śivacaitanya in the Kumbha near the Homakuṇda into which the power of the Lord had been invoked may be subjected to Udvāsana, Nivedya offered to Lokeśas, Dvāreśas, and Dakṣiṇa given to the chief priest and his disciples. Annadānādis may be

given to Brahmins, dependants, servants, the poor, the destitute and the like, as prescribed in Pratiṣṭāvidhi and prayer offered before the Lord for the welfare, well-being and prosperity of all living creatures.[15] The Kalaśavidhis, thus, get concluded in the fiftieth Paṭala.

Notes

1. Sudheesh Namboothiri, Tantra Nighaṇdu, Pub. B.C. Books, 2011, p. 71.
2. Ibid, p. 35
3. ISGP, Vol. IV- Paṭ. 50, Sl. 136
4. ibid, Sl.137-139
5. ibid, Sl. 140-156
6. ibid, Sl. 162-166
7. ibid, Sl. 178-184
8. ibid, Sl. 197-211
9. ibid, Sl.224-225
10. ibid, Sl. 226-230
11. ibid, Sl. 231-240, Vyūhakramas and Mantras;
12. ibid, Sl. 241-248

13. ibid, Sl. 346-347

14. ibid, Sl.345-359

15. ibid, Sl. 360-367

Details of Tantric works edited from ORI & MSSL, University of Kerala

1. तन्त्रसमुच्चयः - (Tantra) by Narayana with the commentary vimarśini of Sankara (Part I, 1-6- Paṭalas).

2. तत्त्वप्रकाशः - Tattvaprakāśa (Agama) by Sri. Bhojadeva with the commentary Tātparyadīpikā of Sri Kumara.

3. ईशानशिवगुरुदेवपद्धतिः - *Īsānaśivagurudevapaddhati* (Tantra) by Īsānaśivaguru devamisra (Part-I, Sāmānyapāda)

4. आर्यमञ्जुश्रीमूलकल्पः - *Aryamañjusrīmūlakalpa* (Part- I)

5. तन्त्रसमुच्चयः - (Tantra) by Narayana with the commentary vimarśini of Sankara (Pat II- 7-12 Paṭalas)

6. ईशानशिवगुरुदेवपद्धतिः - *Īsānaśivagurudevapaddhati* (Tantra) by Īsānaśivaguru devamisra (Part II Mantrapada)

7. आर्यमञ्जुश्रीमूलकल्पः - *Aryamanjusrimulakalpa* (Part II)

8. ईशानशिवगुरुदेवपद्धतिः - *Īsānaśivagurudevapaddhati* (Tantra) by Īṣānaśivaguru devamiśra (Part III- Kriyāpāda, 1-30 Paṭalas)

9. ईशानशिवगुरुदेवपद्धतिः - *Īsānaśivagurudevapaddhati* (Tantra) by Īsānaśivaguru devamisra (Part IV Kriyāpāda, 31-64 Paṭalas)

10. आर्यमञ्जुश्रीमूलकल्पः - *Aryamañjusrīmūlakalpa* (Part-III)

11. विष्णुसंहित - *Viṣṇusamhita* (Tantra)

12. वैखानसागमः - *Vaikhānasāgama* (Tantra) by Marīci

13. तन्त्रसमुच्चयः - (Tantra) by Narayana with the commentary vimarśini of Sankara and vivaraṇa of Narayana śiṣya (Part- I)

14. तन्त्रसमुच्चयः - (Tantra) by Narayana with the commentary vimarśini of Sankara and vivaraṇa of Narayana śiṣya (Part -III)

Trivandrum Sanskrit Series No. 275



About the Author

Dr. J.P. Prajith, The Author is a PhD. Holder in Tantric Literature (Sanskrit Sahitya) from Sree Sankaracharya University of Sanskrit SSUS Kalady, Kerala. He had worked as Assistant Professor in Sanskrit and the Head of the Department in different colleges of SN Trusts, such as SN College, Kollam, SN College Cherthala, and SN College Varkala. Presently working as Assistant Professor in Sanskrit, Oriental Research Institute and Manuscripts Library, University of Kerala, Kariyavattam, Thiruvananthapuram and also holding the position as a member, Academic Committee UG Sanskrit, Sree Narayana Open University, Kollam.He was awarded with the Vaidika Sahitya Puraskara from Kerala Sahithya Academy in 2014, for his outstanding work Tantra Sahitya. He was a member of Board of studies UG- Sanskrit, University of Kerala. He has published three renowned books named Tantra Sahitya, Published from Kerala Bhasha Institute, Thiruvananthapuram, Evaluation of Tantric Culture, Kaveri books, New Delhi and Bhasha Tantra - Padavum Padanavum, Kerala Bhasha Institute, Thiruvananthapuram. He has also written extensively for journals, UGC project, periodicals and magazines and presents papers in national and international seminars and conferences.

ISBN 978-1-234-56789-7

Rs:120.00/-